# संस्कृतवार्ता:

**दिनाङ्क :-27.07.2025** **प्रात: - 06:55**

**प्रधानमन्त्री/राजेन्द्रचोलः**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य तमिलनाडु-राज्यस्य गङ्गैकोण्ड-चोलपुर-मन्दिरे आदि-तिरुवतिरै-महोत्सवे अपि च महतः चोलसम्राजः राजेन्द्रचोलप्रथमस्य जयन्त्युत्सवे सहभागं करिष्यति। प्रधानमन्त्री भारतस्य श्रेष्ठ-सम्राजः राजेन्द्रचोल-प्रथमस्य सम्मानने एकां स्मारकमुद्राम् अपि विमोचयिष्यति।

**प्रधानमन्त्री/थुथुकुडी**

गतवासरे प्रधानमन्त्री मालदीवात् प्रत्यागमनानन्तरं तमिलनाडु-राज्ये थूथुकुड्यां अष्टचत्वारिंशत्-शत-कोट्यधिक-रूप्यकाणाम् अनेकेषां विकास-परियोजनानां शिलान्यासम्, उद्घाटनं राष्ट्राय अर्पणं च कृतवान्। परियोजनाभिः क्षेत्रीयसम्पर्क-वर्धनं, स्वच्छोर्जायै आधारभूत-संरचना-सुदृढीकरणं, सम्पूर्णे तमिलनाडु-प्रदेशे नागरिकानां जीवन-गुणवत्ता-वर्धनं च भविष्यन्ति। एते उपक्रमाः विमानस्थानक-राजमार्ग-नौपत्तन-रेलमार्ग-महत्त्वपूर्ण-विद्युत्क्षेत्रादिभिः प्रमुखैः क्षेत्रैः सम्बद्धाः सन्ति।

**प्रधानमन्त्री/'मन की बात'-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रात: एकादश-वादने आकाशवाणीत: 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् चतुर्विंशत्यधिकैक-शत-तमं संस्करणं भविष्यति। आकाशवाण्या: दूरदर्शनस्य च सर्वाभि: वाहिनीभि: अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि आकाशवाणी-वार्ता-विभागस्य अन्तर्जाल-पटले चल-दूरभाषीय-तन्त्रांशे च उपलब्ध: भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रि-कार्यालय-सूचनाप्रसारण-मन्त्रालय-कार्यालयानां यूट्यूब-वाहिनीभि: अपि अस्य कार्यक्रमस्य साक्षात्- प्रसारणं भविष्यति। हिन्दी-भाषायां प्रसारणस्य पश्चात् आकाशवाण्या अस्य प्रसारणम् क्षेत्रीयासु भाषासु अपि भविष्यति।

**पीयूष-गोयल:**

वाणिज्योद्योग-मन्त्रिणा पीयूष-गोयलेन भारत-ब्रिटेन-देशयो: मध्ये सद्य एव हस्ताक्षरितं मुक्त-व्यापार-सन्धिपत्रं महत्वपूर्ण-क्रान्तिपूर्ण-परिवर्तनत्वेन प्रतिपादितम्। नवदिल्ल्यां श्रीमता गोयलेन भणितं यत् सन्धिपत्रम् इदम् बहुषु क्षेत्रेषु अवसराणि प्रदास्यति।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

**ऋतु:**

भारतीयर्तु-विज्ञान-विभागेन अद्य पश्चिमीये मध्यप्रदेशे, पूर्वीये राजस्थाने गुजराते च अतिवृष्टे: रक्तवार्णिकी संचेतना प्रकाशितास्ति। ऋतुविभागेन अरुणाचलप्रदेश-असम-मेघालय-तटवर्तिकर्णाटक-राजस्थान-झारखण्ड-मणिपुर-मिजोरम-त्रिपुरा-ओडिशा-तमिलनाडु-पुदुचेरी-कराइकलेष्वपि भीषण-वृष्टे: संचेतना प्रसारिता।

**क्रिकेट्**

भारत-इंग्लैण्डयोः मध्ये अनुवर्तमानायां पञ्च-स्पर्धात्मिकायाम् एंडरसन-तेंदुलकर-चषक-निकष-क्रिकेट्-क्रीडा-मालिकायां मैनचेस्टरे ओल्ड-ट्रैफर्ड-इत्यत्र आयोजितस्य चतुर्थ-द्वन्द्वस्य अन्तिमे दिने आतिथेयम् इंग्लैण्डं विरुध्य स्वीय-द्वितीय-पाल्यां क्रीडकद्वय-हानिपूर्वकं भारतेन चतुस्सप्तत्यधिक-शत-धावनाङ्काः अर्जिताः।

**।।इति वार्ता:।।**